2154

# प्रश्न बैंक

कक्षा- उत्तरमध्यमा द्वितीय खण्डः (12)

विषय- वेदः

(पाठ्यपुस्तक आधारित)

कोड:- 1219

महर्षि पतंजलि संस्कृत संस्थान भोपाल
क्रमांक 260
दि. 11-2-22

AD(J)

USingh
डॉ. (श्रीमती) उषा सिंह
शास. संस्कृत उ.मा.वि.
विदिशा (म.प्र.)

3

इकाई - 3

शब्दार्थः / विलोमशब्दः 1×6=6

1- पुर्वम्
2- धीमतां
3- आसाद्य
4- आक्रम्य
5- स्वराः
6- तन्वम्
7- जयेम
8- अदब्धः
9. आशीः
10 द्रविणम्
11. सुम्नम्
12. अहिः
13. स्तोमः
14- ऋचा
15- पावकः

आदर्श उत्तर

- पुर्व नियमन्
बुद्धिमता
प्राप्य
- अतिक्रम्य
- स्वरवर्णाः
- शरीरम्
- अभिभवेम्
अहिंसितः
शुभाशीर्वाद
धनम्
सुखम्
सर्पः
~~स्त्रो~~ स्तोत्रम्
1. गिरा
5- शोधकः

—×—

1

## विलोम शब्द:

1. पुत्र
2. देवता
3. अत्र
4. शब्द:
5. पुरुष:
6. ज्ञानम्
7. आदित्य:
8. शत्रु:
9. सरल:
10. प्राचीन
11. जाया
12. पिता
13. भेद:
14. संयोग:
15. गुण:

## आदर्श उत्तर

1. पुत्री
2. दानव:
3. तत्र
4. अर्थ:
5. स्त्री
6. अज्ञानम्
7. शशि:
8. मित्र:
9. कठिन:
10. अर्वाचीन:
11. पति
2. माता
3. अभेद:
14. वियोग:
15. दोष:

— x —

प्र०/1- संधि विच्छेदं / सन्धिमेलनम् (इकाई 1) वेदः कोड 1219 1×3 = 3 1×3 = 3 = 06

पाठ्यपुस्तक आधारित

1. ग्रन्थेऽस्मिन्
2. यद्यपि
3. पादोऽस्य
4. चित्यग्ने
5. वाचकोऽपि
6. अत्यधिकावश्यकता
7. प्रश्नोत्तराभ्याम्
8. सम्पूर्णः + अपि
9. प्र + उक्तम्
10. तत् + शतपथम्
11. सूत्रम् + इदम् + उपन्यस्तम्
!2. ग्रन्थः + अयम्
3. वेद + अङ्गेषु
4. सर्व + उच्चः
5. निः + तारः

## आदर्श उत्तर

1. ग्रन्थे + अस्मिन्
2. यदि + अपि
3. पादः + अस्य
4. चिति + अग्ने
5. वाचकः + अपि
6. अत्यधिक + आवश्यकता
7. प्रश्नः + उत्तराभ्याम्
3. सम्पूर्णोऽपि
1. प्रोक्तम्
0. तच्छतपथम्
1. सूत्रमिदमुपन्यस्तम्
2. ग्रन्थोऽयम्
3. वेदाङ्गेषु
4. सर्वोच्चः
5. निस्तारः



—x—x—

2 इकाई 2 धातु: / शब्दरूपाणि / क्रियापदानि 1×6 = 6

1. 'छात्राः' इत्यस्मिन् पदे का वचनम् अस्ति ।
2. 'वेदस्य' इत्यस्मिन् पदे का विभक्तिः अस्ति ।
3. 'अहम्' इत्यत्र का पुरुषः अस्ति ।
4. 'यस्मात्' अत्र का विभक्ति अस्ति ।
5. 'तस्मिन्' इत्यस्मिन् पदे का विभक्ति अस्ति ।
6. 'अस्' धातोः लृट्लकारस्य प्रथम पुरुष बहुवचनम् रूपं किम् ?
7. हे इन्द्र! इत्यस्मिन् पदे का विभक्तिः अस्ति ।
8. 'गच्छति' क्रियापदे कः धातुः अस्ति ।
9. 'पठ्' धातोः लृट्लकारस्य मध्यमपुरुषस्य बहुवचनमस्य रूपं लिखत ?
10. 'हस्' धातोः लट्लकारस्य प्रथमपुरुषस्य एकवचनस्य रूपंलिखत ?
11. 'भवति' इत्यत्र का लकारः अस्ति ।
12. 'कुर्वन्ति' इत्यस्मिन् पदे का वचनम् अस्ति ।
13. 'कुरु' इत्यत्र का धातु अस्ति ?
14. 'पश्यामः' इत्यस्मिन् पदे का धातुः अस्ति ।
15. 'वद्' धातोः लोट्लकारस्य मध्यमपुरुष बहुवचनं रूपं किम् ?

## आदर्श उत्तर

1. बहुवचनम्
2. षष्ठी विभक्ति
3. उत्तमपुरुषः
4. पंचमी विभक्तिः
5. भविष्यन्ति
6. सम्बोधन
7. (7)
8. 'गम्' धातुः
9. पठिष्यथ
10. हसति
11. लट्लकारः
12. बहुवचनम्
13. 'कृ' धातु
14. 'दृश्' धातुः
15. वदत

5. सप्तमी विभक्तिः

5 इकाई ५ 1×5 = 5

प्र० निम्नांकितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत—

1- निरुक्तस्य कर्ता ----। (यास्कः / पारस्करः)
2. समग्राणां ज्ञानानाम् आधारः ---- ब्रह्म विद्यते। (वाक् / चक्षुः)
3. ब्राह्मणशब्दः ---- अर्थे सिद्ध्यति। (निर्वचन / व्याख्या)
4. माध्यन्दिनशतपथब्राह्मणे ---- काण्डाः। (द्वादश / चतुर्दश)
5- गृह्ये शब्दे ---- धातुः। (ग्रह / गृह)
6. गृह्य शब्दे ---- प्रत्ययो भवति। (क्यप् / अञ्)
7. वेदानां ---- अङ्गानि सन्ति। (षड् / चत्वारि)
8. मुखं ---- स्मृतम्। (व्याकरणम् / शिक्षा)
9. कल्पसूत्राणां ---- भागेषु विभाजनं कृतम्। (पञ्च / चतुर्षु)
10. याज्ञवल्क्यस्य ---- पत्न्यौ स्तः। (तिस्रः / द्वे)
11. वर्णानां सन्धिः ---- सन्ति। (द्विविधाः / चतुर्विधाः)
12. अनुस्वारस्य वर्णः ----। (रक्तः / पीतः)
13. वैदिकमन्त्राणामर्थज्ञानाय ---- उपयुज्येत्। (निरुक्तः / छन्दः)
14. पारस्करगृह्यसूत्र ---- काण्डेषु विभक्तः। (त्रिषु / षट्सु)
15- ग्रन्थस्य विभागः ---- दृश्यते। (काण्डेषु / मन्त्रेषु)

## आदर्श उत्तर

1- यास्कः
2- वाक्
3- व्याख्या
4- चतुर्दश
5- ग्रह
6- क्यप्

5

6.

7- षड्

8- व्याकरणम्

9. चतुर्षु

10. द्वे

11. चतुर्विधाः

12- पीतः

13. निरुक्तः

14. त्रिषुः

15- काण्डेषु

— x — x —

x



1x5 = 5

युग्ममेलनं कुरुत—

| 'अ' | 'आ' |
|---|---|
| 1. वेदाः | 1. ~~ओम~~ पतंजलिः |
| 2. मन्त्रविशिष्ट वेदांश | 2. वेदः |
| 3. मन्त्रब्राह्मणयोः | 3. कौथुम शाखा. |
| 4. कात्यायनः | 4. वैतान |
| 5. भाष्यकारः | 5. चत्वारः |
| 6. वेदेषु स्वराः | 6. वाल्मीकिः |
| 7. वाजसनिपुत्रः | 7. वेदव्यासः |
| 8. अथर्ववेदः | 8. शांखायन |
| 9. कात्यायनस्य पुत्रः | 9. ब्राह्मणः |
| 10. ऋक्तन्त्रप्रातिशाख्य | 10. पारस्करः |
| 11. सांख्यदर्शन | 11. जयरामः |
| 12. योगसूत्रम् | 12. त्रयः |
| 13. रामायणम् | 13. याज्ञवल्क्यः |
| 14. महाभारतम् | 14. वररुचिः |
| 15. ऋग्वेदः | 15. कपिलमुनिः |

आदर्श उत्तर—:

1. चत्वारः
2. ब्राह्मणः
3. वेदः
4. पारस्करः
5. जयरामः
6. त्रयः
7. याज्ञवल्क्यः
8. वैतान
9. वररुचिः
10. कौथुम शाखा
11. कपिलमुनिः
12. पतंजलिः
13. वाल्मीकिः
14. वेदव्यासः
15. शांखायन



—x—

1×4 = 4

प्र० – आम् / न लिखत ?

1- य र ल व अंतस्थः नास्ति । (आ

2. श ष स ह ऊष्माणः अस्ति ।

3. पञ्च स्वरभक्तय उररीक्रियन्ते ।

4. शिक्षा ग्रन्थेषु याज्ञवल्क्य शिक्षा महत्वपूर्ण नास्ति ।

5- यज्ञः देवानाँ सुखकर्तुम प्रत्यागच्छति ।

6. ग्रहः सूर्यसमानः अस्ति ।

7. भारतीय सांस्कृतिक परम्परायाँ वेदानाँ स्थानं गौरवास्पदं अस्ति ।

8. ब्राह्मण भागोऽपि ब्राह्मणारण्यकोपनिषद् भेदात् नास्ति ।

9. महाभाष्यकारानुसारेण सहस्रवर्त्मा सामवेदः अर्थात् सामवेदस्य सहस्रशाखाः आसन्

10. कात्यायनश्रौतसूत्रे विंशतिः अध्यायाः सन्ति ।

11. औदीच्यानाँ परम्परा कात्यायनीयास्ति ।

12. वेदपाठ विधौ शुद्धमुच्चारणं स्वरक्रिया च योग्यरीत्या काम्यते ।

13. प्रातिशाख्यग्रन्थेऽपि पञ्चग्रन्थाः महत्वपूर्णाः सन्ति ।

14. मुखं व्याकरणम् स्मृतम् ।

15. ब्राह्मणग्रन्थस्य पञ्च भागाः ।

## आदर्श उत्तर

1. न
2. आम्
3. आम्
4. न
5. आम्
6. आम्
7. आम्
8. न
9. आम्
10. न
11. आम्
12. आम्
13. आम्
14. आम्
15. न



—x—x—

प्र०- एकैकवाक्येनोत्तराणि लिखत ? इकाई - 7 2×10 = 20

प्र०1- ऋषयः केषां द्रष्टारः ?

प्र०2. 'वाचा विरूप नित्यता' इदं वाक्यं कस्मिन् वेदे ?

प्र०3. को नाम अर्थवादः ?

प्र०4. ब्राह्मणग्रन्थस्य कति भागाः ?

प्र०5- ~~प्रथमकाण्डे~~ पारस्करगृह्यसूत्रस्य त्रयः भाष्यकाराणां नामानि लिखत ?

प्र०6. अथर्ववेदप्रातिशाख्ये कति अध्यायाः सन्ति ?

प्र०7. तैत्तरीयप्रातिशाख्यस्य प्रथमखण्डे कति अध्यायाः सन्ति ?

प्र०8- कात्यायनश्रौतसूत्रे कति अध्यायाः सन्ति ?

प्र०9- याज्ञवल्क्यशिक्षा केन ग्रन्थेन सह सम्बद्धा वर्तते ?

प्र०10- शुक्लयजुर्वेदे कति प्लुतानि सन्ति ?

प्र०11- अपराविद्यायां के ग्रन्थाः समाविष्टाः ?

12. वैकुण्ठगोलोकादिषु प्रकाशमानः कः अस्ति ?

प्र०13- तिरोहित विराटपुरुषः कदा दृष्टो भवति ?

प्र०14- हर्यश्वस्वामी कः अस्ति ?

प्र०15- शत्रुसेनाजयार्थं कस्याशीर्वादम् अपेक्षते ?

## उत्तराणि

उ०1- ऋषयः मन्त्रदृष्टारः न च कर्तारः ।

उ०2- 'वाचाविरूपनित्यता' इदं वाक्यं ऋग्वेदे अस्ति ।

उ०3- प्राशस्त्यनिन्दात्मकं वाक्यमर्थवादः ।

उ०4- ब्राह्मणग्रन्थस्य त्रय भागाः ।

उ०5- पारस्करगृह्यसूत्रस्य अनेके भाष्यकाराः सन्ति तेषु कर्क- जयराम - हरिहर - गदाधरश्च प्रसिद्धाः ।

उ०6. अथर्ववेदप्रातिशाख्ये चतुरध्यायाः सन्ति ।

उ०7- तैत्तरीयप्रातिशाख्यस्य प्रथमखण्डे द्वादशाध्यायाः सन्ति ।

उ०8- कात्यायनश्रौतसूत्रे षड्विंशतिः अध्यायाः सन्ति ।

उ०9- याज्ञवल्क्यशिक्षायाः सम्बन्धः शुक्लयजुर्वेदीयवाजसनेयी-शाखया सह वर्तते ।

10- सप्त प्लुतानि शुक्लयजुर्वेदे विद्यन्ते ।

10.

11- वेदाः वेदाङ्गानि च अपरा विद्या वर्तते ।

12. बैकुण्ठगोलोकादिषु प्रकाशमानः विराट्पुरुषः अस्ति ।

13. तिरोहितविराटपुरुषः कल्पयोर्दृष्टव्योऽस्ति ।

14. हर्यश्वस्वामि इन्द्रः अस्ति ।

15- इन्द्राग्निसूर्यमरुत्गणादि सर्वे देवाः युद्धसंग्रामे (मम पक्षग्रहणं कुर्वन्तु) शत्रुसेनाजयार्थं अपेक्षते ।

— x — x —

मन्त्राः/पद्यांशः सरलार्थः लिखत ? 3x2=6

1- कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे ।
देवममीवचातनम् ॥

2- तं त्वा गोपवनो गिरा जनिष्ठदग्ने अङ्गिरः ।
स पावक श्रुधी हवम् ॥

3- अग्ने रक्षाणो अंहसः प्रति स्म देव रीषतः ।
तपिष्ठैरजरो दह ॥

4- अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः ।
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम् ।

5- तस्मै ध्रुवाया दिशो अन्तर्देशात् ।
रुद्रमिष्वासमनुष्ठातारमकुर्वन् ॥

6- विद्म ते सभे नाम नरिष्टा नाम वा असि ।
ये ते के च सभासदस्ते मे सन्तु सवाचसः ॥

7- शैशिरावेनं मासौ ऊर्ध्वाया दिशो गोपायतो ।
द्यौश्चादित्यश्चानु तिष्ठतो य एवं वेद ॥

:- आदर्शउत्तर -:

1- हे स्तोतृसंघ ! अध्वरे क्रतौ कविं मेधाविनं- सत्यधर्माणम् सत्यवचन-रूपेण धर्मेणोपेतं देवं द्योतमानम् अमीवचातनम् अमीवानां हिंसकानां शत्रूणां वा घातकम् अग्निम् उपस्तुहि उपेत्य स्तुतिं कुरु ।

2. हे अग्ने त्वां गोपवनः ऋषिः स्तुत्या जनयति वर्द्धयति सः तादृशाग्नि अङ्गिरसः पुत्र ! पावक शोधक ! हवं गोपवनस्याह्वानं श्रुणु ।

3. हे अग्ने ! त्वम् अस्मान् पापात् पाहि । हे देव. द्योतमानाग्ने जराहितस्त्वं हिंसतः शत्रून् तपिष्ठैरतिशयेन भस्मीकुरु ।

4. पुत्रः पितुः अनुगमनं करोतु । माताऽपि पुत्रानुकूला भवतु । पत्नीरपि पतिं प्रति मधुरयुक्ता वाणी तेनाऽस्माकं गृहस्य वातावरणं शुद्धं सात्विकं च भवतु । सपरिवारेण सह वयं उन्नतिं रुद्रकृपां च प्राप्नुयामः ।

5. ध्रुवदिशः अन्तर्देशात् बाणप्रक्षेप-कर्तुः रुद्रस्य सर्वैः देवैःमिलित्वा यज्ञानुष्ठानरूपेण नियुक्तिः कृता । यज्ञानुष्ठानस्योत्तरदायित्वं रुद्रेभ्यः प्रदत्तम् ।

6. हे सभे ! वयं तव नाम जानीमः । तव नाम "नरिष्ठा" रूपेणप्रसिद्धम् अस्ति । तव ये सभासदः ते सर्वे अस्माभिः सह समतायुक्त-भाषणकर्तारः भवन्तु । वयमपि सभायां सभ्याः भवामः ।

7. सर्वशेन रुद्रेण शिशिरऋतोः मासद्वयं रक्षितं ! यज्ञानुष्ठानरक्षकः स्वयं रुद्रोऽस्ति । अतः यज्ञः सुरक्षितः अस्ति । यज्ञानुष्ठातृरूपौ "आदित्याकाशौ" स्तः । तौ द्वौ "आदित्याकाशौ" यज्ञानुकूलौ भवेताम् ।

— x — x —

प्र०- गद्यांशस्य प्रश्नोत्तराणि ।

क- व्याकरण महाभाष्ये ऋग्वेदस्य एकविंशतिशाखाः आसन् । यजुर्वेदस्य शतशाखाः आसन् । सामवेदस्य सहस्रशाखाः आसन्, अथर्ववेदस्य नवशाखाः आसन्, तादृशं प्रतिपादितमस्ति, अन्यच्च चरणव्यूहानुसारेण सूत्रसमय परिशिष्टग्रन्थे ① शाकलः ② बाष्कलः ③ आश्वलायनः ④ - शांखायन ⑤ माण्डूकेयः तादृश्यः ऋग्वेदस्य पंचशाखाः गण्यन्ते ।

प्र.1- यजुर्वेदस्य कति शाखाः आसन् ।

प्र.2- सामवेदस्य कति शाखाः आसन् ।

प्र.3- अथर्ववेदस्य कति शाखा आसन् ।

ख- रुद्राभिषेकस्य महत्वं शास्त्रे प्रतिपादितमस्ति यत् ये मानवाः प्रतिदिनं रुद्रपूजनं कृत्वा रुद्राभिषेकादिकं कुर्वन्ति, ते मानवाः मनोवाञ्छितफलं प्राप्नुवन्ति, ग्रहजनितदोषाणां निवृत्तिर्भवति एवम् रोगादिनां शीघ्रमेवोपशमनं भवति । रोगात् मुक्तिर्भवति, रुद्रहृदयोपनिषद अनुसारेण शिव एव वा रुद्रएव "सर्वदेवात्मको रुद्रः सर्वे देवाः शिवात्मकाः" ।

प्र.1- रुद्राभिषेकस्य महत्त्वं कुत्र प्रतिपादितमस्ति ?

प्र.2- कस्य पूजनं रुद्राभिषेकम् कथ्यते ?

प्र.3- जनाः रुद्राभिषेकेन किम् ........ प्राप्नुवन्ति ?

प्र०3- ख- चतुर्षु वेदेषु आदिमवेदः ऋग्वेदः वर्तते । 'विद्' धातोः समुत्पन्नोऽयं शब्दः तस्यार्थः "ज्ञानम्" भगवतः आदिनारायणस्य निःश्वासरूपाः वेदाः सन्ति । अतएव वेदाः अपौरुषेयाः नित्याः सर्व-सत्यविद्योपेतश्च सन्ति । ऋग्वेदे तु स्थले-स्थले न केवलं मानवानां कल्याणं परं प्राणिमात्राणां कल्याणं हितसाधनं कथं भवेत्, इति उपदिष्टमस्ति ।

प्र.1- आदिमवेदः कः ?

प्र०2- 'वेद' इत्यस्मिन् पदे का धातुः अस्ति ।

प्र०3- वेदाः कीदृशा सन्ति ।

## :- आदर्श उत्तर -:

क- 1. यजुर्वेदस्य शतशाखा आसन् ।
2. सामवेदस्य सहस्त्रशाखा आसन् ।
3. अथर्ववेदस्य नवशाखा आसन् ।

ख- 1- रुद्राभिषेकस्य महत्वं शास्त्रे प्रतिपादितमस्ति ।
2- रुद्रपूजनं रुद्राभिषेकं कथ्यते ।
3- जनाः रुद्राभिषेकेन मनोवाञ्छितफलं प्राप्नुवन्ति ।

ग-
1- आदिमवेदः ऋग्वेदः ।
2- 'वेद' इत्यस्मिन् पदे 'विद्' धातुः अस्ति ।
3- वेदाः अपौरुषेयाः नित्याः सर्व-सत्यविद्योपेताश्च सन्ति ।

— x — x —

प्र०— मन्त्रपूर्तिः विधेया ?

1- ममाग्ने वर्चो ——— जयेम ॥
2- अग्ने मन्युं ——— विनेशत् ॥
3- उरुव्यचा नो ——— परा दाः ॥
4- कदाचन ———— ।
5- उपयामगृहीतोसिसावित्र; ——— ।
6- देवसवितः ———— ।
7- आपयेस्वाहा ———— ।
8- नित्वा नक्ष्य ——— सुवीरमग्न आहुतः ॥
9- शं नो देवीः ——— अभिस्रवन्तु नः ।
10- पाहि नो ——— चसर चतसृभिर्वसो ॥
11- त्वँ नश्चित्र ——— तुचे तु नः ॥
12- सहृदयं ———— इवाघ्न्या ॥
13- ग्रीष्मावनं ——— एवं वेद ॥
14- तस्मा उदिच्या ——— चानुष्ठातारौ ॥
15- त्र्यम्बकम्यजामहे ———— ॥

## :- आदर्श उत्तर -:

1- ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम ।
महयं नमन्तां प्रदिशश्चतस्त्रस्त्वयाध्यक्षेण पृतना जयेम ॥

2- अग्ने मन्युं प्रतिनुदन् परेषामदब्धो गोपाः परि पाहि नस्त्वम् ।
प्रत्यञ्चः यन्तु निगुतः पुनस्तेऽमैषां चित्तं प्रबुधां विनेशत् ॥

3- उरुव्यचा नः महिषः शर्म यंसदस्मिन् हवे पुरुहूतः पुरुक्षुः ।
स नः प्रजायै हर्यश्च मृलयेन्द्र मा नो रीरिषो मा परा दाः ॥

4- कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन्भूयऽइन्नु ते दानन्देवस्य पृच्यतऽआदित्येभ्यस्त्वा ।

5- उपयामगृहीतोसि सावित्रोसि चनोदाश्चनोधाऽअसि चनो मयि धेहि ।
जिन्व यज्ञञ्जिन्व यज्ञपतिम्भगाय देवाय त्वा सवित्रे ॥

6- देवस्याहं सवितुः सवे सत्यप्रसवसो बृहस्पतेर्वाजजितो वाजञ्जेषम् ।
वाजिनो वाजजितोऽध्वन स्कभ्नुवन्तो योजना मिमानाः काष्ठाङ्गच्छत ॥

7. आपये स्वाहा स्वापये स्वाहा पिजाय स्वाहा क्रतवे स्वाहा वसवे ।

नित्वा नक्ष्य विश्पते द्युमन्तं धीमहे वयम् ।
सुवीरमग्न आहुतः ॥

8. शं नो देवीरभिष्टये शं नो भवन्तु पीतये ।
शं योरभिस्रवन्तु नः ॥

9. पाहि नो अग्न एकया पाह्युत द्वितीयया ।
10. पाहि गीर्भिस्तिसृभिरूर्जांपते पाहि चतसृभिर्वसो ॥

11. त्वं नश्चित्र ऊत्या वसो राधांसि चोदय ।
अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥

12. ॐ सहृदयं सांमनस्यमविद्वेषं कृणोमि वः ।
अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या ॥

13. ग्रैष्मावनं मासौ दक्षिणाया दिशो गोपायतो ।
यज्ञायज्ञियं च वामदेव्यं चानु तिष्ठतो य एवं वेद ॥

14. तस्मा उदीच्या दिशः ॥ शारदौ मासौ ।
गोप्तारावकुर्वन् श्यैतं च नौधसं चानुष्ठातारौ ॥

15. त्र्यम्बकं यजामहे यजामहे त्र्यम्बकं त्र्यम्बकं यजामहे ।

— x — x —

इकाई–10

प्र०– टिप्पणी लिखत / कवि-परिचयः लिखत / कण्ठस्थीकृतश्लोकः च 4×5=20

1. वेदाः अपौरुषेयाः इति विषयं लिखत ?
2. शतपथ ब्राह्मणस्य वैशिष्ट्यं किम् ?
3. पारस्करगृह्यसूत्रस्य परिचयं ददातु ?
4. ऋग्वेद प्रातिशाख्यस्य विस्तारपूर्वकं परिचयं लिखत ?
5. वेदाङ्गेषु कल्पसूत्रस्य महत्वं लिखत ?
6. आचार्य कात्यायनस्य परिचयं वर्णयतु ?
7. ~~विराट~~ विराटपुरुषस्य वर्णनम् ?
8. आचार्य याज्ञवल्क्यस्य परिचयं लिखत ?

## आदर्श उत्तर

1. वेदाः नित्याः अपौरुषेयाश्च सन्ति । सृष्ट्यादौ ऋषयः समाधौ दिव्यया प्रतिभया, मेधया, योगेन च मन्त्रान् पश्यन्ति चिन्वति गृह्णन्ति च । तस्मात् प्रयोग काले मन्त्रेण सह तस्य ऋषिनामग्रहणमावश्यकम् अन्यथा स मन्त्रः कर्मफलसहायको न भवति ।

2. शुक्लयजुर्वेदस्य एक एव ब्राह्मणग्रन्थः सः ब्राह्मणः ग्रन्थः 'शतपथब्राह्मणम्' इति कथ्यते । आचार्यैः अस्य ग्रन्थस्य व्युत्पत्तिः विशिष्टरूपेण कृता । तद्यथा – 'शता पन्थानो मार्गानामाध्यायाः यस्य तच्छतपथम्' । शतपथ-ब्राह्मणमिति नामकरणं शताध्यायात्मकत्वात् जातम् ।

3. सम्प्रति समुपलब्धेषु प्रकाशितेषु गृह्यसूत्रेषु पारस्करगृह्यसूत्रस्य सर्वोत्तम-स्थानं विद्यते । ग्रन्थस्य विभागाः काण्डेषु दृश्यते । त्रिषुकाण्डेषु विभक्तमिदं सूत्रम् । काण्डेषु कण्डिकयाः उपविभागाः विद्यन्ते ।

4. ऋग्वेदप्रातिशाख्यम्– ऋग्वेद प्रातिशाख्यस्य प्रचीनता प्रामाणिकता एवं वैज्ञानिकाध्ययनदृष्ट्या स्थानं गण्यते । अतः ऋग्वेदीयमन्त्राणां सर्वैः विना-शङ्कया ग्रहणं स्वीकृतम् । तेन प्रतिभाति यत् ऋग्वेदप्रातिशाख्यस्य प्रभावः सविशेषः ।

5. कल्पसूत्रः – वेदाङ्गेषु कल्पसाहित्यम् महत्वम् अत्यधिकं वर्तते । कल्प-सूत्राणां ब्राह्मणैः एवम् आरण्यकग्रन्थैः सह सम्बन्धः वर्तते । कल्पसूत्रम् संक्षिप्तम् एवं व्यवहारोपयोगी सूत्रः अस्ति । कल्पसूत्राणां चतुर्षु भागेषु विभाजनं कृतम् – ① श्रौतसूत्रम् ② गृह्यसूत्रम् ③ धर्मसूत्रम् ④ शुल्वसूत्रम्

6. पुराणानामवगाहनेन ज्ञायते याज्ञवल्क्यस्य पुत्रः कात्यायनो बभूव । महर्षि कात्यायनः शुक्लयजुर्वेदस्य पारंगतो विद्वान बभूव । आचार्यस्य अनेकानि ग्रन्थरत्नानि श्रूयन्ते । श्रौतविद्यायाश्चाद्वितीयो ज्ञाता । श्रौतसूत्रकर्तुः महर्षि कात्यायनस्य परिचयः पुराणादौ प्राप्यते ।

यदा विराट् पुरुषस्य विभाजनं जातम्, अस्य विराटपुरुषस्य सृष्टयां ब्राह्मणाः मुखमासीत् अर्थात् मुखात् ब्राह्मणाः समुत्पन्नाः, क्षत्रियाः भुजाभ्यां समुत्पन्नाः, वैश्याः जँघाभ्यां समुत्पन्नाः, पद्भ्यां शूद्राः समुत्पन्नाः सन्ति । अस्य विराटपुरुषस्य मनसा चन्द्रमा समुत्पन्नः ।

7. याज्ञवल्क्यस्य द्वौ पत्न्यौ स्तः, मैत्रेयी कात्यायनी च । शिक्षा ग्रन्थेषु याज्ञवल्क्यशिक्षा महत्वपूर्णा अस्ति । अपत्यार्थे सः याज्ञवल्क्यः वाजसनेयः अपि कथ्यते । याज्ञवल्क्यशब्दोऽपि विद्वद्भिः विचारितः तदनुसारं यज्ञस्य वल्कलं वस्त्रं यः धारयति स याज्ञवल्क्यः । याज्ञवल्क्यस्य निवासस्थानं मिथिला इति ज्ञायते तथा च तस्य कर्मस्थानं महाभारतानुसारेण सौराष्ट्र इति मन्यते ।

— x — x —

8= स्वपाठ्यपुस्तकस्य शुद्दश्लोकद्वयं लेखनं अवश्यं करणीयाः ?

— x —

प्र० – दीर्घ- उत्तरीय प्रश्नाः                     इकाई –11                     5×2 =10

प्र. 1- जटापाठ लक्षणं लिखत ?

प्र. 2- मालापाठस्य लक्षणं लिखत ?

प्र. 3- शिखापाठस्य लक्षणं लिखत ?

प्र. 4- रथपाठस्य लक्षणं लिखत ?

प्र. 5- घनपाठस्य लक्षणं लिखत ?

प्र. 6- वेदानां महत्वं लिखत ?

प्र. 7- अथर्ववेदस्य महत्त्वं लिखत ?

प्र. 8- रुद्रशब्दस्य का व्याख्या ?

प्र. 9- सामवेदस्य ब्राह्मणानि विषये लिखत ?

प्र. 10- सामवेदस्य महत्वं लिखत ?

:- आदर्श उत्तर -:

उ. 1- द्विपदादिक्रमाः पञ्च प्रक्रमाद्युत्क्रमात्ततः ।
पुनः क्रमादुक्त्यादिता जटात्वं प्रापिता बुधैः ॥

उ. 2- ब्रूयात्क्रमविपर्यासानर्धर्चस्यादितोऽन्ततः ।
अन्तश्चादि नये देवं क्रममालेति गीयते ॥
मालामलेव-पुष्पाणां पदानां ग्रथिनी हि सा ।
आवर्तते त्रयस्तस्यां क्रमव्युत्क्रमसंक्रमाः ॥

उ. 3- पदोत्तरां शिखामेव जटायामः प्रचक्षते ।
आर्याः पदोत्तरसंक्रमा जटां शिखां प्रवदन्ति ॥

उ. 4- पादशोऽर्धर्चशो वापि सहोक्त्वा दण्डवद्रथः ।
ऋचोर्धर्चयोः पदयोर्दण्डवत्संहितापदक्रमैः ॥
सहोक्त्वा रथो विहितो भवतीत्यर्थः ॥ सहोक्तिरेव रथइति यावत् ।

5. शिखा जटा घनः प्रोक्ता इत्यष्टौ विकृतीः पठेत् ।
अन्तक्रमं पठेत्पूर्वमादिपर्यन्तमानयेत् ।
आदिक्रमं नयेदन्तं घनमाहुर्मनीषिणः ॥

6. वेदानां महत्वम् - वेदानां ज्ञानं वयं पवित्रतमं स्वीकुर्मः । वेदाः परमात्मनः नारायणस्वरूपाः सन्ति । तेषां ज्ञानं परमात्मसम्बन्धितज्ञानम् अस्माभिः स्वीक्रियते । वेदमन्त्राणां संरक्षणार्थं भारतीयऋषयः असाधारणाऽद्वितीयाः कृतयत्नाः आसन् । चतुर्वेदाः सस्वरकण्ठस्थाः करणीया एवं कारयितव्याः ।

7. अथर्ववेदस्य महत्वम् - चतुर्वेदेषु ज्ञानविज्ञानरूपोऽयम् अथर्ववेदः विद्यते । एकस्मिन् श्लोके ऋषिः अथर्ववेदस्य यः ज्ञाता तस्य वा अथर्ववेदस्य महत्वं प्रतिपादयति - यस्य राज्ञो जनपदे अथर्वा शांतिपारागः ।
निसत्यादि तद्राष्ट्रं वर्धते निरुपद्रवम् ॥

8. रुद्रशब्दस्य व्याख्या - रुत् नाम दुःखं द्रावतीति 'रुद्रः' अर्थात् दुःखस्य नाशं करोति सः रुद्रः वर्तते । वायुपुराणे एकस्मिन् श्लोके लिखितमस्ति, प्रतिदिनं यः रुद्राभिषेकं करोति सः शरीरेण रुद्र इव जायते ।

9. सामवेदस्य बहूनि ब्राह्मणानि सन्ति - यथा पञ्चविंश ब्राह्मणम् षड्विंश ब्राह्मणम्, ताण्ड्य ब्राह्मणम्, सामविधानब्राह्मणम्, आर्षेयब्राह्मणम् च

10. सामवेदस्य महत्वम् - सर्वेषु वेदेषु चोपनिषत्सु सामवेदस्य गौरवमयं स्थानं महन्महत्वञ्च दरीदृश्यते । तद्यथा बृहद्देवतायाम् - सामानि यो वेत्ति स वेद तत्वम् । ऋग्वेदेऽपि यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति ।

— x — x —